3.3.2-14

# INTERNATIONAL Conference

On

# Śabdārthatattvavimarśaḥ

(शब्दार्थतत्त्वविमर्शः)

**5 th & 6 th March, 2019**

## Proceedings

Editors :
Dr. Swarup Singha,
Dr. Uttam Biswas,
Rajib Sinha,
Asit Kr. Sau

Organised by :
Vidyasagar University
Sanskrit Alumni Association

In Collaboration with
Department of Sanskrit,
Vidyasagar University

Santal Bidroha Sardha Satabarshiki Mahavidyalaya
ESTD 2005
Goaltore
Paschim
Medinipur

APhadikari
Principal
S.B.S.S. Mahavidyalaya
Goaltore, Paschim Medinipur

# International Conference
On
# Śabdārthatattvavimarśaḥ
# (शब्दार्थतत्त्वविमर्शः)

प्रकाशनम्

5 th March, 2019

ISBN – 9789382-399452

मूल्यम् – ५००.००

विद्यासागरविश्वविद्यालयस्य संस्कृतविभागीयभूतपूर्वविद्यार्थिपरिषद्
VIDYASAGAR UNIVERSITY SANSKRIT ALUMNI ASSOCIATION
पश्चिममेदिनीपुरम्, पश्चिमवङ्गः

Santal Bidroha Sardha Satabarshiki Mahavidyalaya
ESTD 2005
Goaltore
Paschim Medinipur

Principal
S.B.S.S. Mahavidyalaya
Goaltore, Paschim Medinipur

| | | | |
|---|---|---|---|
| 76 | আচার্য ভর্তৃহরির মতে শব্দব্রহ্ম | শিল্পা বিশাই | 293 |
| 77 | বাক্যপদীয়ে শব্দার্থতত্ত্বচিন্তন | সুবীর দলুই | 296 |
| 78 | কাব্যসাহিত্যে শব্দার্থবিবেচনা | সুব্রত কুমার মান্না | 300 |
| 79 | শব্দার্থতত্ত্ববিমর্শঃ | সুপর্ণা মণ্ডল | 303 |
| 80 | কাব্যশাস্ত্রে অভিধা লক্ষণা ব্যাঞ্জনা | সুস্মিতা পোড়িয়া | 306 |
| 81 | কাব্যপ্রকাশের আলোকে লক্ষণা | তরুণ কুমার ভূঞ্যা | 309 |
| 82 | কিরাতার্জুনীয়ম্ মহাকাব্যে প্রথমসর্গে প্রযুক্ত শব্দসমূহের ঘন্টাপথটীকানুসারে ব্যাকরণাত্মক বিশ্লেষণ | চন্দন মণ্ডল | 312 |
| 83 | মীমাংসাদর্শনে শব্দার্থতত্ত্ববিমর্শ | নমিতা সাহা | 317 |
| 84 | উপনিষদ ও শব্দব্রহ্ম | প্রসেনজিৎ মণ্ডল | 323 |
| 85 | গীতাসু শব্দার্থতত্ত্ববিমর্শঃ | রাজীব ভট্টাচার্য | 325 |
| 86 | সাহিত্য শাস্ত্রে শব্দার্থ তত্ত্ব বিমর্ষ | তুষার পাত্র | 326 |
| 87 | কাব্যপ্রকাশানুসারে অভিধা, লক্ষণা, ব্যঞ্জনা - পর্যালোচনা | রানু কোলে | 330 |
| 88 | শব্দের আলোকে ব্রহ্ম | সুকন্যা সরকার | 333 |
| 89 | বৈয়াকরণদের স্ফোটতত্ত্ব মীমাংসা | অনিমা সাহু | 336 |
| 90 | শাব্দবোধের কারণসমূহ সমীক্ষা | দীনবন্ধু মণ্ডল | 341 |
| 91 | परमलघुमञ्जुषायाम् शब्दशक्तिनिरुपणम् | प्रलय: शङ्कर: अधिकारि | 344 |
| 92 | श्रीशिवरामेन्द्रसरस्वतीविरचितसिद्धान्तरत्नप्रकाशस्थितप्रातिपदिकार्थविचारविमर्शः | सुकान्तमान्ना | 347 |
| 93 | Vamana's notion of *lakṣaṇa* in the light of his definition of *vakrokti* | Dr. Pratim Bhattacharya | 352 |
| 94 | The Logico-Linguistic Analysis Of Sabda Pramana : With Special Reference To Advaita Vedanta | *Dr.Rasmita Satapathy,* | 356 |
| 95 | The word '*Tātparya*' and its meaning in Indian Rhetoric Grammar | *Dr. Tarak Jana,* | 360 |
| 96 | Exploring The Meaning Of The Terms Used In The Nyāyasutra | Junashmita Bhuyan | 363 |
| 97 | लिङर्थविमर्श: | स्नेहालदेशपाण्डे: | 368 |
| 98 | অভিধা-লক্ষণা-ব্যঞ্জনাবিমর্শঃ | সুপ্রিয়া বেরা | 378 |
| 99 | शाब्दबोधे केचन विषया: न ते शब्दप्रतिपाद्या: | कृष्णपददास-अधिकारि | 383 |


Adhadikari

**Principal**
**S.B.S.S. Mahavidyalaya**
**Goaltore, Paschim Medinipur**

Santal Bidroha Sardha Satabarshiki Mahavidyalaya
ESTD 2005
Goaltore
Paschim
Medinipur

# शाब्दबोधे केचन विषयाः न ते शब्दप्रतिपाद्याः

**1.0. भूमिका**—शब्दप्रमाणे शब्दार्थतत्त्वविषयकमालोचनं प्रवर्तते। पदार्थतत्त्वं तु व्यापकीभूतविषयः यो हि भारतीयदर्शनानां प्रधानतः न्यायवैशेषिकाणां प्रतिपाद्यविषयः। पदार्थानां पदजन्यतायां विश्वासभाजनेषु न्यायवैशेषिकाः सर्वाग्रगण्यत्वेन प्रकृतपक्षे एत एव पदार्थवादिनः (realistic philosophers)। शब्दार्थतत्त्वं शाब्दबोधसम्बन्धित्वेन वैयाकरणसाहित्यिकानामप्यत्र प्रवृत्तिर्दृश्यते। शब्दार्थतत्त्वे शाब्दबोधप्रकरणे वा पदपदार्थोपस्थितौ वाक्यार्थोपपत्तौ वा न्याय-व्याकरण-मीमांसा-साहित्यिकानां भिन्नानि मतानि स्युः, तथापि न्यायमतमुररीकृत्य यो हि विषयोऽत्र उत्तोलितः तत्र प्रायो न केनापि विरुद्धम्। शाब्दबोधप्रकरणे (शब्दप्रमाणे) सर्वेऽपि विषयाः शब्देन प्रतिपाद्या इति सामान्यतः प्रतीयमानत्वेऽपि केचन तत्र न शब्देन प्रतिपादिताः सन्ति। ते खलु प्रकारीभूतविषयाः यथा 'घट' इति शब्दोच्चारणे प्रकारीभूतविषयः घटत्वं न शब्दप्रतिपाद्यम्। 'नीलो घट' इत्युदाहरणे नीलपदार्थः प्रकारीभूतः, किं त्वसौ शब्देनोल्लिखितः। अतो न सर्वे प्रकारीभूतविषयाः शब्दप्रतिपाद्याः। एवं 'घट' इत्यादौ घटत्वप्रकारक-समवायसंसर्गक-घटविशेष्यकशाब्दबोधे समवायाख्यसंसर्गविषयोऽपि न शब्दप्रतिपाद्यः। साहित्यशास्त्रेऽपि यथा 'कलिङ्गः साहसिक' इत्यादिना कलिङ्गवासीति, यथा वा 'भ्रम धार्मिक विश्वस्तः स श्वाद्य मारितस्तेन। गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन।।' इत्यादिना न भ्रम इत्याद्यर्थाः शब्देन अप्रतिपाद्यत्वेऽपि यथाक्रमं लक्षणया व्यञ्जनया चोपस्थाप्यन्ते।[1] एवमपरे केचन विषयाः सन्ति न ते शब्दप्रतिपाद्याः—एतमेव विषयमाधारीकृत्य प्रबन्धेऽस्मिन् आलोचनं कृतम्।

**2.0. शब्दः अर्थश्च**—शब्दो (word) न्यायवैशेषिकाणां द्रव्यगुणः। सो ध्वन्यात्मकः वर्णात्मकश्चेति भेदेन द्विविधः।[2] ध्वन्यात्मकशब्दानामप्यर्थाः सन्ति। सुखदुःखादिषु भेरीवाद्यादीनामर्थजनकत्वदर्शनात्। अध्वन्यात्मकानामवर्णात्मकानामपि कलाचित्राणां (art/graphics) शब्दत्वमीष्टमेव। परं संगीतवादैः वर्णजनकता दुरूहत्वेऽपि चित्राणां तज्जनकत्वसम्भवादेषां वर्णात्मकशब्दत्वमेव। ध्वन्यात्मकशब्दानां व्यवहारजनकत्वेऽपि वर्णात्मकशब्द एव शाब्दबोधे कारणं भवति। यथा घ्-अ-ट्-अ-स्-इत्यनेन 'घटः' इत्यादिना घटत्वविशिष्टसमवायसंसर्गकघटविशेष्यकः शाब्दबोधः जायते। तत्र कः शब्द इत्युक्ते, येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द इति वैयाकरणाः। शब्दो न प्रमाणमिति सौगताः। मीमांसकास्तु वैदिकशब्दः प्रमाणं लौकिकस्त्वनुवादकः इत्याहुः। शब्दाह्वयं वागाख्यं ज्योतिःप्रकाशकत्वात् तेज इव इति साहित्यिकानामभिप्रायः।[3] तत्र आप्तवाक्यं शब्दः इति नैयायिकाः।[4] शब्दस्योपरि अधिकसूचनाप्रप्तये विशेषतः शब्दविभाजनं ज्ञातुं न्यायकोशः अनुसरणीयः।

**2.1.** अर्थः पदार्थः (word meaning)। प्रमेयमित्यस्य नामान्तरम्। जात्याकृतिविशिष्टव्यक्तिरेव पदार्थः।[5] अर्थः वाच्यः शक्यो वा, पदं वाचकः शक्तो वा। अर्थवाचने पदं शक्तः। अतः पदपदार्थयोः वाचकवाच्यभाव एव सम्बन्धोऽस्ति। यत्किमपि पदं स्यात्, अवश्यमेव तस्य अर्थः स्यात्। पदपदार्थौ समनियतौ। अर्थात् यत्यत् पदं तत्तदर्थविशिष्टं, यो यो पदार्थः सोऽपि पदजन्य एव। एतन्मते नास्ति किमपि पदं यस्यार्थो न, न वास्ति कोऽपि पदार्थो यो न वचनेऽप्रकाश्यः। पदमस्ति अर्थो नास्ति, अर्थोऽस्ति परं तस्याभिधेयत्वं नास्तीति न भवति न्यायशास्त्रे। तेन न्यायमते गगनारविन्दं न पदम्। शक्तं पदमिति पदलक्षणयोगात्। किं तु व्याकरणमते इदं पदम्। गगनारविन्दमित्यस्य सुबन्तत्वात्।

**3.0. शाब्दबोधः**—पदज्ञानकरणं ज्ञानं शाब्दबोधः। तच्च वाक्यार्थज्ञानम्। शब्दाज्जायमानो बोधः इति। शाब्दबोधे पदज्ञानं करणम्। पदजन्यपदार्थोपस्थितिर्व्यापारः। शाब्दबोधः फलम्। पदज्ञानस्य च शक्तिज्ञानम् आकाङ्क्षायोग्यतासन्निधीनां ज्ञानं च सहकारि इति नव्यनैयायिकानां मतम्। उक्तं च न्यायसिद्धान्तमुक्तावल्याम्—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।८१।।
लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः।
आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते।।८२।।
कारणं सन्निधानं तु पदस्यासत्तिरुच्यते।
पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता।।८३।। इति।[6]

**3.1.** वाक्यार्थज्ञानमित्यस्य एकपदार्थेऽपरपदार्थस्य संसर्गविषयकं ज्ञानमित्यर्थः। यथा 'गामानय' इति वाक्यजन्यः गोकर्मकानयनानुकूलकृतिमांस्त्वम् इति शाब्दबोधः। यथा वा 'चैत्रस्तण्डुलं पचति', 'देवदत्तो ग्रामं गच्छती'त्यादितश्च शाब्दबोधः। नैयायिकमते कर्त्राख्यातस्थले 'चैत्रः पचती'त्यादौ पाकानुकूलकृतिमांश्चैत्रः इति शाब्दबोधः। कर्माख्यातस्थले तु 'चैत्रेण पच्यते तण्डुल' इत्यादौ तृतीयायाः कर्तृत्वमर्थः। फलावच्छिन्नव्यापारो धात्वर्थः। कर्मत्वमाख्यातार्थः। तथा हि चैत्रनिष्ठकृतिजन्यपाकजन्यफलशाली तण्डुलः इत्यन्वयबोधः।



APhadikar
Principal
S.B.S.S. Mahavidyalaya
Goaltore, Paschim Medinipur
Santal Bidroha Sardha Satabarshiki Mahavidyalaya
ESTD 2005
Goaltore
Paschim
Medinipur

'देवदत्तो ग्रामं गच्छती'त्यत्र द्वितीयाया: अर्थ: कर्मत्वम्। धातोरर्थो गमनम्। जनकत्वं संसर्गमर्यादया लभ्यम्। लटो वर्तमानत्वमर्थ:। आख्यातस्य कृतिरर्थ:। तत्सम्बन्ध: संसर्गमर्यादालभ्य:। एकवचनाद्युपस्थापितमेकत्वादिसर्वत्र प्रथमान्तपदोपस्थापितेऽन्वेति। एवं च ग्रामकर्मकगमनजनकवर्तमानकालिककृतिमान् एकत्वविशिष्टो देवदत्त: इत्यन्वयबोध:।[7]

| कर्तृवाच्यम् | देवदत्त: तण्डुलं पचति | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| पदानि | देवदत्त | सु | तण्डुल | अम् | पच् | | तिप् | | |
| पदार्था: | देवदत्तत्वविशिष्ट | | तण्डुलत्वविशिष्ट | कर्मत्व | पाक | विक्लित्ति | कृति | एकत्व | वर्तमानकाल |
| शाब्दबोध: | तण्डुलाभिन्नकर्मनिष्ठ-वर्तमानकालिकपाकानुकूलविक्लित्त्यनुकूलकृतिमान् एकत्वविशिष्टदेवदत्त: | | | | | | | | |
| कर्मवाच्यम् | देवदत्तेन तण्डुल: पच्यते | | | | | | | | |
| पदानि | देवदत्त | टा | तण्डुल | सु | पच् | ते | | | |
| | देवदत्तत्वविशिष्ट | कृति | तण्डुलत्वविशिष्ट | | विक्लित्ति | कर्मत्व | एकत्व | वर्तमानकाल | |
| शाब्दबोध: | देवदत्तनिष्ठकृतिजन्य-वर्तमानकालिकव्यापारजन्य-विक्लित्त्याश्रय-तण्डुल: | | | | | | | | |

**4.0. विषया: न ते शब्दप्रतिपाद्या :**—शाब्दबोधे सर्वे विषया: न शब्दप्रतिपाद्या:। अर्थात् शब्देनानुल्लिखिता: अपि केचन विषया: सन्ति ये खलु ज्ञाने भासन्ते। तत्र अनुल्लिख्यमानजात्यखण्डोपाधय: पदार्थद्वयसंसर्ग: लक्षणाव्यञ्जनाभ्यामुपस्थापिता: अर्था: न शब्दप्रतिपाद्या:। ज्ञानानां सविशेषणतया सविषयतया च शब्दप्रमाणे प्रकार-संसर्ग-विशेष्यविधया अर्थात् विषयत्रयेण शाब्दप्रमा जन्यते। तथा हि 'घट:' इति पदात् घटत्वप्रकारक-समवायसंसर्गक-घटविशेष्यकज्ञानमुत्पद्यते। अस्मिन्नुदाहरणे ये त्रय: विषया: प्रतिपादिता: तेषु केवलं विशेष्यं शब्देनोपस्थापितम् अन्यत्सर्वं शब्देनानुल्लिखितमपि ज्ञाने भासते। शाब्दबोधे वृत्तिसम्बन्धेन पदार्थानां स्मरणं न तु दर्शनं भवति। अत्र त्रय: विषया: स्मारिता:, तेषु घटत्वं समवायश्च निर्विकल्पकज्ञानेनोपस्थाप्येते। घटत्व-समवायौ शब्देनानुल्लिखितौ अपि शाब्दे भासेते, अनुल्लिख्यमानजात्यखण्डोपाध्यतिरिक्तपदार्थानां निरवच्छिन्नभानानभ्युपगमात्। तेन 'घटे घटत्वमि'त्युच्चारिते घटत्वस्य भानं घटत्वत्वप्रकारेण स्यात्। अत्र घटत्वत्वमखण्डोपाधि:। एतच्च घटत्वत्वं न केनापि शब्देन प्रतिपाद्यम् (उल्लिखितम्), किं तु ज्ञानेऽस्य प्रकारतया भासनमवसम्भावि, घटत्वस्य विशेष्यतया उल्लिखितात्। 'चैत्रस्य धनमि'त्यादौ चैत्रनिरूपितस्वत्ववद्धनमिति शाब्दबोधे चैत्रपदार्थ: षष्ठ्यर्थस्वत्वपदार्थ: धनपदार्थश्च शब्देन प्रतिपादिता:, किं तु निरूप्यनिरूपकभावसम्बन्ध: मत्वर्थाधायताख्यसम्बन्धश्च न केनापि शब्देन प्रतिपाद्येते। अप्रतिपाद्यत्वेऽपि सम्बन्धद्वयं संसर्गमर्यादया भासते। एवं च 'छत्रिणो यान्ती'त्यादौ अछत्रिपदाभावेऽपि लक्षणया अछत्रिपदार्थस्य बोधो जायते। अत्र अछत्रिपदार्थो न शब्दप्रतिपाद्य:। किं तु व्यञ्जनादिघटितवक्रोक्तौ यथा—काले कोकिलवाचाले सहकारमनोहरे। कृतागस: परित्यागात्तस्याश्चेतो न दूयते।।[8]—इत्यादौ काक्वा 'दूयत' एवेति विध्यर्थे यो विषय उपस्थापितस्तेन शब्दप्रतिपाद्यत्वेऽपि नञर्थग्रहणं न भवति। अर्थात् क्वचिदर्थ: शब्देन प्रतिपाद्यत्वेऽपि नासौ शाब्दबोधे भासते।

**4.1. वाक्यार्थबोधे संसर्गस्योपस्थिति :**—एवं शाब्दबोधे संसर्गोऽपि विषयो नैष: शब्देन प्रतिपाद्यते। यथा 'नीलो घट:' इत्यत्र संसर्गतावादिनां मते नीलाभिन्नघट:, प्रकारतावादिनां मते तु नीलाभेदवान् घट इत्याकारेण शाब्दबोध: भवति। तत्र नीलत्वविशिष्टपदार्थ: घटत्वविशिष्टपदार्थश्च शब्देनोल्लिखितौ।

**4.2.** संसर्गतावादिनां मते अभेद: सम्बन्ध: एव सो न विशेषणविभक्ते: अर्थ:। तत्र नीलपदोत्तरा सुविभक्ति: विशेषणविभक्तित्वेन पदसाधुत्वार्थे प्रयुक्ता तेन नास्या: कश्चिदर्थोऽस्ति। एतन्मतेऽभेद: संसर्गमर्यादया लभ्यते। शाब्दबोधे एकपदार्थेऽपरपदार्थस्य संसर्ग: संसर्गमर्यादया भासते इति नियमात्।[9] अत्र नीलत्वशिशिष्टरूपेण नील: गुणपदार्थ:, घटत्वविशिष्टरूपेण घटो द्रव्यपदार्थ:। एतयोरुपस्थिति: स्मरणं वा साक्षात्पदादेव



Santal Bidroha Sardha Satabarshiki Mahavidyalaya
ESTD 2005
Goaltore
Paschim
Medinipur

Principal
S.B.S.S. Mahavidyalaya
Goaltore, Paschim Medinipur

जायते। शाब्दबोधे पदार्थानां वृत्तिज्ञानाधीनपदज्ञानजन्यस्मृतिविषयत्वात्। यद्यत्राभेदः सुविभक्तिलभ्यस्तेनासौ शब्दप्रतिपाद्य इति, यदि संसर्गमर्यादया लभ्य इत्युच्यते तदा नासौ शब्देन प्रतिपाद्य इति वक्तव्यम्। प्रकारतावादिनां मतेऽभेदः विशेषणविभक्तेरर्थः। तेनाभेदो न संसर्गः, पदार्थ एव। तत्र नीलपदार्थेन सह अभेदस्य सम्बन्धः आधेयता। अभेदपदार्थेन सह घटपदार्थस्य सम्बन्धः आश्रयता। तेन नीलनिष्ठाभेदाश्रयघटः इत्याकारेण शाब्दबोधः जायते।

**5.0. संसर्गमर्यादया**—संसर्गस्य संबन्धस्य मर्यादा सीमा 'संबन्धस्य सीमा' इत्याकारेण अस्य शब्दस्यार्थः यद्यपि किञ्चिद्रूपेण स्फुटं भवति, किं त्वियमेका पारिभाषिकशब्दः। रघुनाथशिरोमणिनाऽऽख्यातवादेऽस्य पदस्योल्लेखः प्रथमवारं कृतः। तत्र तेनापि 'सम्बन्धमर्यादा' इत्याख्यमपरमेकं तत्समानेर्थे (संसर्गमर्यादार्थे) अपि प्रयुक्तम्। किं तु गदाधरेण व्युत्पत्तिवादे केवलं संसर्गमर्यादापदं चितम्। व्युत्पत्तिवादस्योपरि कृष्णंभट्टेन कृतायां कृष्णंभट्टयाख्यायां टीकायामस्य शब्दस्यार्थ एवं स्पष्टीकृतः—समभिव्याहारज्ञानकार्यतावच्छेदककोटिप्रविष्टसम्बन्धता एव संसर्गमर्यादा।[10] यद्वा भवतु रूढ्यर्थे संसर्गमर्यादाशब्दस्यार्थ 'आकाङ्क्षा'। व्युत्पत्तिवादेऽपि श्रूयते—संसर्गमर्यादाशब्द आकाङ्क्षायां रूढः। अनया संसर्गमर्यादयोपस्थापिताः विषयाः न शब्दप्रतिपाद्याः। 'नीलो घटः' इत्यादौ अभेदो यदि शब्दाप्रतिपाद्यस्तेनायं संसर्गमर्यादया लभ्यः। संसर्गमर्यादालभ्योऽर्थो न पदार्थः, अयमपदार्थः। अत एवोच्यते—अपदार्थोऽपि संसर्गः संसर्गमर्यादया भासत इति।

**6.0. निष्कर्षः**—भारतीयदर्शनेषु शब्दशास्त्रेषु च आविष्कृता शाब्दबोधप्रक्रिया 'Cognitive Science' इति क्षेत्रे भृशं प्रशंसिता। अस्य प्रक्रियाया उपयोगेन प्रायः सर्वासु विश्वस्तरीयभाषास्विदानीं शब्दजाल-यन्त्रानुवाद-रूपविज्ञानानुशीलनादिषु विविधक्षेत्रेषु तन्त्राशः (software) विनिर्मितः। तत्र संस्कृतभाषायां तादृशी प्रगतिर्न दृश्यते। अतः भारतीयभाषाणामस्मिन् क्षेत्रेऽधिकतरमुत्साहं वर्धयितुं प्रबन्धोऽयं विरचितः। शाब्दबोधे के के विषयाः पदोपस्थापिताः के च न—इति नियमपूर्वकमवधारणेन कृत्रिमबोधस्य (Artificial Intelligence) कृते अन्तर्वर्तिभाषानिर्माणे (intermediate language) सौविध्यं भवति। अन्तर्वर्तिभाषां विना यन्त्रानुवादो न सम्भवपरं भवति। यद्धि शास्त्रीयसंस्कृतमिति उच्यते तद्धि शाब्दबोध इति नाम्ना व्यपदिश्यते, एतद्धि संगणकविज्ञानस्य कृतेऽन्तर्वर्तिभाषा। शाब्दबोधः शास्त्रीयसंस्कृतं वा भवतु, इदं न कथ्यभाषा। 'नीलो घटः' इत्यादिः कथ्यभाषा, किं तु 'नीलाभिन्नघटो' न भवेत्। एवं हि नीलाभिन्नघट इत्यादिकमन्तर्वर्तिभाषां भवितुं सुयोग्यम्। ईदृग्विधायाः भाषायाः गुरुतरप्रयोजनं संगणकविज्ञाने भवत्येव। अस्मिन् क्षेत्रे संस्कृतवाङ्मयस्य शाब्दबोधप्रक्रिया सर्वोत्कृष्टा। तत्रास्य प्रबन्धस्योपयोगोऽस्ति। सामान्यतः यः शब्दप्रतिपाद्योऽर्थः (word meaning) सः कृत्रिमबोधेन शब्दजालानुसरणेन लभ्येत, किं तु शब्देनानुपस्थापितस्यार्थस्य लाभः केनोपायेन स्यादिति युक्तिरस्मिन् प्रबन्धे आविष्कृता। शब्दाप्रतिपाद्यविषयानामप्येको नियमः स्यात्। एतदर्थं शब्दाप्रतिपाद्यार्थसम्बन्धिशब्दजालम् (wordnet) अपि प्रवर्तनीयं येन शाब्दबोधोपरि कृत्स्नं ज्ञानं स्यात्। यद्वा नव्यन्यायव्याकरणादिकठिनग्रन्थे प्रवेष्टुं ये धीरगतिच्छात्राः (slow learners) सन्ति तेषां कृते प्रबन्धोऽयं प्रदीप इव भाति मे मति इति।

**Notes and References:**


1. *विश्वनाथकविराजकृत साहित्यदर्पण* (Oriya), सम्पा. ड. व्रजसुन्दर मिश्र, प्राच्यभारती पब्लिकेशान्, भुवनेश्वर - ७, २००४, पु. २०६, २१९।
2. श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधो ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।
   — *Tarkasangraha of Annambhatta* (TSAB), Ed. Y. V. Athalye, Bombay Sanskrit Series, No. LV, 2nd Edition, Bhandarkar Oriental Research Institute, Pune, 1988, P. 21.
3. *दण्डिकृतः काव्यादर्शः*, (Bengali), सम्पा. युधिष्ठिर गोप, सदेश, १०१ सि. विवेकानन्द रोड, कोलकाता, ७००००६, तृतीय संस्करण, २००६, पु. ६।
4. आप्तवाक्यं शब्दः। आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः। वाक्यं त्वाकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहः।
   — *श्रीकेशवमिश्रप्रणीता तर्कभाषा*, (Hindi), सम्पा. बदरीनाथ शुक्ल, मोतीलाल बनारसी दास, जवाहर नगर, दिल्ली, ११०००७, सप्तम मुद्रण, २०१७, पु, १३७।
   आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः।
   — TSAB, P. 40.
5. *श्रीविश्वनाथपञ्चाननभट्टाचार्यप्रणीता न्यायसिद्धान्तमुक्तावली* (किरणावलीटीकासहिता), व्याख्याता. पं. श्रीकृष्णवल्लाभाचार्यः, तृतीयसंस्करणम्, चौखम्भा-संस्कृत-संस्थानम्, गोपाल-मन्दिर-लेन्, वाराणसी, १९८३, पु. ३१०-३१४।
6. *तत्रैव*, पु. २९१-३४५।




Santal Bidroha Sardha Satabarshiki Mahavidyalaya
ESTD 2005
Goaltore
Paschim
Medinipur

Principal
S.B.S.S. Mahavidyalaya
Goaltore, Paschim Medinipur

7. *महामहोपाध्यायभीमाचार्येण विरचित: न्यायकोश:*, Bhandarkar Oriental Research Institute, Pune, 1978, Pp. 860-867।

8. *साहित्यदर्पण (दशमपरिच्छेद)* (Bengali), सम्पा. उदयचन्द्र वन्द्योपाध्याय:, संस्कृत बुक डिपो, २८य१, विधान सरणी, कोलकाता-६, २०००, पृ. २०-२१।

9. *श्रीमद्गदाधरभट्टाचार्यविरचित: व्युत्पत्तिवाद: (अभेदान्वयप्रकरणम्)*, सम्पा. अच्युतानन्ददाश:, न्यू भारतीय बुक कार्पोरेशन, काशीराम मार्केट, कमलानगर, दिल्ली, ११०००७, पृ. ११९।

10. तत्रैव, VV-K. 1.1.1, पृ. १४७।



कृष्णपददास-अधिकारी

*संस्कृतविभागप्रधान:*

साँओताल-विद्रोह-सार्ध-शतवार्षिकमहाविद्यालयस्य

*krushnapada06@gmail.com, 9732944721*





Sanjal Bidroha Sardha Satabarshiki Mahavidyalaya
ESTD 2005
Goaltore
Paschim
Medinipur

Principal
S.B.S.S. Mahavidyalaya
Goaltore, Paschim Medinipur